**श्रीवरवरमुनिभिरनुगृहीता**
**॥ यतिराज विंशतिः ॥**

यः स्तुतिं यतिपति प्रसादिनीम्
व्याजहार यतिराज विंशतिम् ।
तम् प्रपन्न जन चातकाम्बुदं
नौमि सौम्यवर योगि पुङ्गवम् ॥

श्रीमाधवाङ्घ्रि जलजद्वय नित्यसेवा
प्रेमाविलाशय पराङ्कुश पादभक्तम् ।
कामादि दोष हरम् आत्म पदाश्रितानां
रामानुजं यतिपतिं प्रणमामि मूर्ध्ना ॥ 1

श्रीरङ्गराज चरणाम्बुज राजहंसं
श्रीमत् पराङ्कुश पदाम्बुज भृङ्गराजम् ।
श्रीभट्टनाथ परकाल मुकाब्ज मित्रं
श्रीवत्सचिह्न शरणं यतिराजं ईडे ॥ 2

वाचा यतीन्द्र मनसा वपुषा च युष्मत्
पादारविन्द युगलं भजतां गुरूणां ।
कूराधिनाथ कुरुकेश मुखाद्य पुंसां
पादानुचिन्तन परः सततं भवेयम् ॥ 3

नित्यं यतीन्द्र तव दिव्यवपुः स्मृतौ मे
शक्तं मनो भवतु वाक् गुण कीर्तनेऽसौ ।
कृत्यञ्च दास्य करणं तु कर द्वयस्य
वृत्त्यन्तरेऽस्तु विमुखं करण त्रयञ्च ॥ 4

अष्टाक्षराख्यमनुराज पद त्रयार्थ निष्ठां
ममात्र वितराद्य यतीन्द्र नाथ ।
शिष्टाग्रगण्य जन सेव्य भवत् पदाब्जे
हृष्टास्तु नित्यं अनुभूय ममास्य बुद्धिः ॥ 5

अल्पापि मे न भव्दीय पदाब्ज भक्तिः
शब्दादि भोग रुचिर् अन्वहम् एधते हा ।
मत् पापम् एव हि निदानम् अमुष्य नान्यत्
तद् वारयार्य यतिराज दयैक सिन्धो ॥ 6

वृत्त्या पशुर् नरवपुस्त्वहम् ईदृशोऽपि
श्रुत्यादि सिद्ध निखिलात्म गुणाश्रयोऽयम् ।
इत्यादरेण कृतिनोऽपि मिथः प्रवक्तुम्
अद्यापि वञ्चन परोऽत्र यतीन्द्र! वर्ते ॥ 7

दुःखावहोऽहम् अनिशं तव दुष्ट चेष्टः
शब्दादि भोग निरतः शरणागताख्यः ।
त्वत् पाद भक्त इव शिष्ट जनौघ मध्ये
मिथ्या चरामि यतिराज! ततोऽस्मि मूर्खः ॥ 8

नित्यं त्वहं परिभवामि गुरुं च मन्त्रं
तद्देवताम् अपि न किञ्चित् अहो बिभेमि ।
इत्थं शठोऽप्यशठवत् भवदीय सङ्घे
हृष्टः चरामि यतिराज! ततोऽस्मि मूर्खः ॥ 9

हा हन्त हन्त मनसा क्रियया च वाचा
योऽहं चरामि सततं त्रिविधापचारान् ।
सोऽहं तवाप्रियकरः प्रियकृद्वत् एव
कालं नयामि यतिराज! ततोऽस्मि मूर्खः ॥ 10

पापे कृते यदि भवन्ति भयानुताप लज्जाः
पुनः करणं अस्य कथं घटेत ।
मोहेन मे न भवतीह भयादि लेशः
तस्मात् पुनः पुनरघं यतिराज! कुर्वे ॥ 11

अन्तर्बहिः सकल वस्तुषु सन्तं ईशं
अन्धः पुरः स्थितं इवाहं अवीक्षमाणः ।
कन्दर्पवश्य हृदयः सततं भवामि
हन्त त्वदग्र गमनस्य यतीन्द्र! नार्हः ॥ 12

ताप त्रयी जनित दुःख निपातिनोऽपि
देह स्थितौ मम रुचिस्तु न तन्निवृत्तौ ।
एतस्य कारणं अहो मम पापं एव
नाथ! त्वं एव हर तत् यतिराज! शीघ्रम् ॥ 13

वाचां अगोचर महा गुण देशिकाग्र्य
कूराधि नाथ कथिताखिल नैच्य पात्रम् ।
एषोहमेव न पुनर्जगत् ईदृशस्तद्
रामानुजार्य करुनैव तु मद्गतिस्ते ॥ 14

शुद्धात्म यामुन गुरूत्तम कूर नाथ
भट्टाख्य देशिक वरोक्त समस्त नैच्यम् ।
अद्यास्त्यसङ्कुचितं एव मयीह लोके
तस्मात् यतीन्द्र! करुणैव तु मद्गतिस्ते ॥ 15

शब्दादि भोग विषया रुचिर् अस्मदीया
नष्टा भवत्विह भवत् दयया यतीन्द्र! ।
त्वत् दास दास गणना चरमावधौ यः
तद्दासतैक रसताऽविरता ममास्तु ॥ 16

श्रुत्यग्र वेद्य निज दिव्य गुण स्वरूपः
प्रत्यक्षतां उपगतस्त्विह रङ्गराजः ।
वश्यः सदा भवति ते यतिराज तस्मात्
शक्तः स्वकीय जन पाप विमोचने त्वम् ॥ 17

काल त्रयेऽपि करण त्रय निर्मिताति
पाप क्रियस्य शरणं भगवत् क्षमैव ।
सा च त्वयैव कमलारमणेऽर्थिता यत्
क्षेमस् स एव हि यतीन्द्र! भवच्छ्रितानाम् ॥ 18

श्रीमन् यतीन्द्र! तव दिव्य पदाब्ज सेवां
श्रीशैल नाथ करुणा परिणाम दत्ताम् ।
ताम् अन्वहं मम विवर्धय नाथ! तस्याः
कामं विरुद्धं अखिलञ्च निवर्तय त्वम् ॥ 19

विज्ञापनं यदिदम् अद्य तु मामकीनम्
अङ्गी कुरुष्व यतिराज! दयाम्बुराशे ।
अज्ञोऽयम् आत्म गुण लेश विवर्जितश् च
तस्मात् अनन्य शरणो भवतीति मत्वा ॥ 20

इति यतिकुल धुर्यं एधमानैः
श्रुति मधुरैर् उदितैः प्रहर्षयन्तम् ।
वरवरमुनिं एव चिन्तयन्ती
मतिर् इयम् एति निरत्ययं प्रसादम् ॥

**॥ इति यतिराज विंशतिः समाप्ता ॥**